भाषाव्याकरणयोः पौर्वापर्यम्

आजादमिश्रः 'मधुकरः'

व्याकरणम् अव्याकृतं व्याकृतञ्चेति द्वेधा। तत्राद्यम् अर्थरूपं ज्ञानमयं सार्वकालिकञ्च। अपरञ्च व्याकृतम् आनुपूर्वीरूपम् अर्थसहितं च। द्वितीयञ्च आनुपूर्वीरूपं भाषातः पश्चात्कालिकम् ऋषिभिः प्रणीतम्। आद्यन्तु अव्याकृतं व्याकरणम् आनुपूर्वीरहितं भाषासमकालिकमेव। उभयोः पौर्वापर्यनिर्णयः वृक्षबीजयोरिव कर्तुमशक्य इति प्रबन्धोऽयं प्रस्तौति।

भाषा नाम जनानां मनोभावसम्प्रेषणार्थकशब्दात्मकसाधनम्। सा च भाषा शब्दतत्त्वा वाक्यरूपा वाक्यकदम्बरूपा वा। वाक्यप्रयोगेणैव वक्ता स्वकीयं हार्दिकं भावं श्रोतारं प्रति प्रेषयति। तस्मिंश्च वाक्ये केचन भावा उद्देश्यरूपेण अन्ये च विधेयरूपेण प्रकाशन्ते। वाक्येन किमप्युद्दिश्य किमपि विधीयते इति भावः। यथा– 'देवदत्तः अहरहः स्वाध्यायमधीते' इति वाक्येन देवदत्तमुद्दिश्य अहरहःकालिकं स्वाध्यायाध्ययनं विधीयते। अत एव उद्देश्यविधेयात्मकं वाक्यं भवतीति साहित्यिकं वाक्यलक्षणम्। तदेवं यत्सिद्धं तदुद्देश्यं यच्च साध्यं तद्विधेयमिति विद्वद्विवेकोऽवधारणीयः। यथा पूर्वोक्ते वाक्ये देवदत्तोऽपि पूर्वतः सिद्धः, अहरहरिति कालोऽपि सिद्धः, स्वाध्यायोऽपि सिद्धः, अध्ययनं च साध्यम्। एवञ्च विवरणोक्तैः सिद्धसाधनैः तत्साध्यं संसाध्यते इत्येव सूच्यते तेन वाक्येन। इत्थं वाक्यरूपाया भाषायाः सामान्यं कार्यम् अर्थः प्रयोजनं वा प्रतिपादितमाचार्यैः।

इयं भाषा वाक्यरूपा। तत्र वाक्यस्य सामान्यं कार्यं प्रयोजनं वा समासेन किञ्चिन्निरूपितम्। तस्य स्वरूपं च पदं पदकदम्बं वा। यथा समुल्लिखिते पदे देवदत्तः इति प्रथमान्तं पदम्, स्वाध्यायमिति द्वितीयान्तं पदम्, अहरहः इति कालाधिकरणबोधकमव्ययं सुबन्तपदम्, अधीते इति तिङन्तपदम्। एवञ्चाहत्य इह चतुर्णां पदानाम् एकः समूहः वाक्यम्। क्वचित् एकमपि पदं वाक्यम्, यथा–

प्रविश, पिण्डीम् इत्यादि। तत्र प्रकरणेन 'त्वम्, भुङ्क्ष्व' इत्यादिपदान्तरस्य अवश्यम् आक्षेपो भवति, किन्तु वाक्यरूपेण प्रयोगस्तु एकस्यैव पदस्य, अतस्तत्र एकमेव पदं वाक्यम्। एवञ्च पदसमूहः पदं वा वाक्यमिति वस्तुस्थितिः, अत्रैव तात्पर्यम्– 'एकतिङ् वाक्यम्'– इति कात्यायनवाक्यलक्षणस्येति बोध्यम्। तानि च पदानि सुबन्ततिङन्ताव्ययभेदेन नानानामानि अनेकरूपाणीति विभावनीयम्। पदानि च तानि प्रकृतिप्रत्ययाङ्गानि वर्णावयवकानि वर्णसमूहरूपाणि भवन्तीति सर्वाभ्युपगमः। एवञ्च भाषा वाक्यरूपा, वाक्यं च पदरूपम्, पदं च वर्णरूपम्। तदेतत्सर्वं शब्दविजृम्भणम्, शब्दविस्तरः, शब्दतत्त्वञ्च। अत एव भाषा शब्दपदेन अनुव्यवसीयते अभिलप्यते बुधैर्वैयाकरणैरिति सर्वतन्त्रसिद्धो राद्धान्तः।

भाषात्मकोऽयं शब्दो निखिलजगद्व्यवहारकारणं चतुर्थं ज्योतिः। तदुक्तं महाकविना दाण्डिना–

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। इति।

शब्दं विना त्रिभुवनम् अन्धन्तमः, अतः आत्रिभुवनं शब्दः। इह आङ् अभिविधौ वर्तते। त्रिभुवनमभिव्याप्य शब्दस्थितिरिति भावः। यस्मात् कालात् त्रिभुवनमारब्धम्, तस्मात्कालादेव शब्दप्रवृत्तिः। शब्दं विना जगत्त्रयस्य कल्पनैव अपार्थेति भावः। यदि त्रिभुवनमेतद् अनित्यम्, शब्दोऽपि अनित्यः। त्रिभुवनं चेत्प्रवाहनित्यतया नित्यम्, तर्हि शब्दोऽपि नित्यः। किञ्च परावाग्रूपात् शब्दतत्त्वादेव त्रिभुवनं प्रवर्तते इति शाब्दिकनयः।

दण्डिना उक्तम्– शब्दोऽयं चतुर्थं ज्योतिः इति। तत्र ज्योतिः बाह्याभ्यन्तरभेदेन द्विविधम्। आदित्यः अग्निश्च इति द्वे बाह्ये ज्योतिषी स्तः। उभे अपि बाह्यं जगत् प्रकाशयतः। ज्ञानं च केवलम् आत्मानम् आभ्यन्तरं प्रकाशयति, अतः ज्ञानम् आन्तरं ज्योतिः। एवञ्चैतत् ज्योतिस्त्रयमतिरिच्य चतुर्थं शब्दज्योतिः बाह्यम् आन्तरं चेति वैयाकरणैः दण्डिना अन्यैश्च समालोचकैः सम्यङ् निरूपितम्। अत एव पतञ्जलिना महाभाष्ये शब्दस्य लक्षणद्वयम् अकारि। तत्रैकेन लक्षणेन शब्दस्य आन्तरप्रकाशकत्वं द्वितीयेन च तस्य बाह्यप्रकाशकत्वमुदीरितम्। तथाहि– प्रथमं लक्षणम्– "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः" इति। उच्चारितेन– मध्यमानादप्रकाशितेन येन स्फोटाख्यशब्देन वर्णव्यतिरिक्तेन अर्थसम्प्रत्ययो भवति स शब्द इति भावः। वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति। वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्, आनर्थक्ये तु प्रत्येकं तेषां समुदायस्य वाचकत्वाभावात्, उत्पत्तिपक्षे तेषां यौगपद्येन उत्पत्त्यभावात्,

अभिव्यक्तिपक्षे तु तेषां क्रमेणैवाभिव्यक्त्या समुदायाभावात्, एकस्मृत्युपारूढानां च वाचकत्वे भ्रमात् कदाचित् 'सरो रसः' इत्यादौ अर्थप्रतिपत्त्यविशेषप्रसङ्गात्, तद्व्यतिरिक्तः स्फोटः वैखरीनादप्रकाशितेन तेन स्फोटशब्देन अर्थसम्प्रत्ययो भवतीति भाष्याशयः। नादप्रकाशितः असौ शब्दः आन्तरं ज्योतिः, मध्यमावाक्पदभाक् नित्यः क्रमवान् वैयाकरणेषु स्फोटनाम्ना विदितः। अस्या एव मध्यमावाचः मूलं पश्यन्ती-वाक् उपसंहृतक्रमा योगिभिरनुभवनीया। पश्यन्त्याश्च मूलं परावाक् मूलचक्रस्था, तस्या एव विवर्तः क्रमेण वैखरीति दर्शनग्रन्थेषु प्रपञ्चितं सर्वम्। वैखरीध्वनिरपि लोके शब्दः इत्याह भाष्यकारः– "प्रतीतपदार्थको लोके ध्वनिः शब्दः" इति द्वितीयं लक्षणम्। बाह्यं ज्योतिः वैखरीध्वनिः शब्दः अनित्यः उच्चरितप्रध्वंसीति शब्दानित्यत्ववादिनां मतेनेदं द्वितीयं शब्दलक्षणमभिहितं भगवता भाष्यकारेण। तथा च इदं शब्दज्योतिः वैखरीध्वनिरूपेण बाह्यं प्रकाशयति, मध्यमानादरूपेण आन्तरं प्रकाशयतीति बाह्यं ज्योतिः आन्तरं चेति द्विविधं ज्योतिरिति आदित्याग्निज्ञानेभ्यः त्रिभ्यः ज्योतिर्भ्यः भिन्नं शब्दज्योतिरित्याशयः महाकविदण्डिनो भर्तृहर्यादीनां च–

प्राप्तरूपविभागाया यो वाचः परमो रसः।
यत्तत्पुण्यतमं ज्योतिस्तस्य मार्गोऽयमाञ्जसः।। इति।

(वाक्यपदीयं ब्रह्मकाण्डः- १२)

अग्निर्यथा स्वप्रकाशेन घटपटादिकं बोधयति, तथैव शब्दोऽपि अर्थप्रकाशकः अतो ज्योतिरित्युक्तं भर्तृहरिणा।

भाषा जगतः व्यवहारकारणमित्युक्त्या उभयोः भाषाजगतोः परस्पराश्रयत्वं सिद्ध्यति। भाषां विना जगतः कल्पना, विना जगद् भाषाकल्पना च न सम्भवति। आध्यात्मिकदृष्ट्या वा लौकिकदृष्ट्या, दार्शनिकपक्षेण व्यावहारिकपक्षेण वा उभयोः भाषाभुवनयोरस्ति अविनाभावः सम्बन्धः। अस्यां स्थितौ यदि जगदनित्यं मन्यते तदा भाषाऽपि अनित्या। यदि च जगद् अनादिकालात् प्रवर्तते, प्रलयात्परमपि जगज्जायते पुनः पुनः इति प्रवाहाविच्छेदेन जगत् प्रवाहवन्नित्यम् इति मन्यते, तर्हि भाषाऽपि प्रवाहनित्यतया नित्येति विभावनीयम्।

अत्रेदमवधेयम्– भाषाजगतोर्यथा अन्योन्याश्रयत्वम् तयोरविनाभावसम्बन्धः, तथा भाषाव्याकरणयोरपि अन्योऽन्याश्रयत्वं परस्पराश्रितत्वम् अविनाभावसम्बन्धश्च तयोः इति दृढमवधारणीयम्। भाषा, तस्या व्याकरणं च अयुतसिद्धपदार्थौ स्तः। विना व्याकरणं भाषास्वरूपं भाषास्थितिर्वा कथमपि न घटेत। यतोहि व्याकरणतत्त्वं विना भाषाप्रतिपाद्यं कोऽपि कथमपि नैवावगच्छेत्। व्याकरणमेव तादृशं समानं तत्त्वं यत्किल भाषया प्रेष्यमर्थम् अन्येभ्योऽवगमयति। अतस्तद्विना भाषा भाषैव न स्यात्।

अत एव भाषाव्याकरणे उभे अयुतसिद्धे स्तः। अतस्तयोरविनाभावः सम्बन्धः। तदुक्तम्–

तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ ययोर्द्वयोः।
अविनश्यदेकमपराश्रितमेवावतिष्ठते।। इति।

भाषातत्त्वं व्याकरणं वा अविनश्यद् एकम् अपराश्रितमेव अवतिष्ठते। एवञ्च यथा गुण-गुणिनोः क्रिया-क्रियावतोः जाति-व्यक्त्योर्वा अविनाभावसम्बन्धः, तथा भाषाव्याकरणयोरपि सैव सम्बन्धोऽवधारितः।

अस्यां स्थितौ अध्यात्मनि लोके वा दार्शनिकदृष्ट्या व्यवहारदृष्ट्या वा भाषा यदि प्रवाहाविच्छेदेन नित्या, तर्हि व्याकरणमपि प्रवाहव्यवस्थया नित्यमवगन्तव्यम्। अथच लोके व्यवहारदृशा भाषा यदि अनित्या, तर्हि व्याकरणमपि लोकदृशा अनित्यं निभालनीयम्। महाभाष्ये व्याकरणप्रयोजनं प्रतिपादयन् भाष्यकार आह– "आगमः खल्वपि– ब्राह्मणेन निष्कारणो धर्मः षडङ्गोऽध्येयः ज्ञेयश्च–इति। प्रधानं षडङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति" इति। इह आगमेन श्रुत्या वेदः षडङ्गश्च निष्कारणो धर्म उदीरितः। कार्यतेऽनेन यागादिः, तत्कारणमिति व्युत्पत्त्या स्वर्गादिफलं कारणम्। एवञ्च निष्कारण इत्यस्य फलानुसन्धानरहितो नित्यः वेदः षडङ्गश्चेति श्रुतिः प्रतिपादयति। अत एव तत्र नागेशेनापि व्याख्यातम्– "श्रुतावपि जनमेजयाद्युपाख्यानस्य प्रवाहनित्यतया श्रुत्याभिधानम्, तथैव पौरुषेयस्य व्याकरणस्यापि श्रुत्या नित्यताबोधनमुपपद्यते। अथवा 'तेन प्रोक्तम्' इति सूत्रभाष्यरीत्या वेदार्थवद् व्याकरणार्थोऽपि अनादित्वरूपनित्यतावान् इति श्रुत्या तस्य नित्यत्वबोधनम्। आनुपूर्व्याः अनित्यत्वेऽपि व्याकरणार्थोऽनादितया नित्य एवेति भावः।

भर्तृहरिरपि भाषाव्याकरणयोः अविनाभूतं सम्बन्धं महता समारोहेण प्रत्यपीपदत् द्वाविंशतौ कारिकासु। यथा–

अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते।। १३।।

अर्थानां घटपटादिव्यक्तीनां प्रवृत्तयः = व्यवहारविषयताः, तासां तत्त्वानि, तेषां निबन्धनम् = ज्ञापकम् शब्दा एव। इह 'वेदः प्रमाणम्' इतिवत् 'शब्दा एव निबन्धनम्' इत्यत्र जातिगतैकत्वमादाय अन्वयः कार्यः। तत्त्वपदेनात्र विवक्षायाः सामान्यस्य साध्यत्वस्य च बोधः। विवक्षावशादेव हि लोका; तत्तदर्थबोधनयोग्यं तत्तच्छब्दं प्रयुञ्जते। यथा– रूपग्रहणयोग्येन चक्षुरिन्द्रियेणैव रूपोपलब्धिः, न तु श्रवणेन, प्रयोगश्च शब्दाधीनः, अतः शब्दमन्तरा विवक्षाया असम्भवात् विवक्षानिबन्धनं

शब्दाः।

घटत्वपटत्वादिसामान्यस्यापि निबन्धनं बोधकः शब्दः। जन्मादिक्रियायाः साध्यत्वस्य निबन्धनं शब्दा एव। सर्वत्र हि प्रथमं नाम बुद्धौ कृत्वैव अर्थं साधयति। यथा– कुम्भकारः पूर्वं बुद्धौ, घटं वा शरावं वा करिष्यामीति विनिश्चित्यैव तदनुसारेण घटं शरावं च रचयति। शब्दानां तत्त्वावबोधः = साधुत्वज्ञानं व्याकरणं विना नास्ति। अतस्तयोः सम्बन्धः, व्याकरणस्य प्राधान्यं च स्फुटम्। तच्च व्याकरणमेकम्–

यदेकं प्रक्रियाभेदैर्बहुधा प्रविभज्यते।
तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते।। २२।। इति।

तद् व्याकरणं ज्ञात्वा मध्यमावागादिज्ञानद्वारा परं ब्रह्म प्राप्नोतीति भावः। सा चैषा भाषाव्याकरणव्यवस्था अनादित्वात् नित्या–

नित्यत्वे कृतकत्वे वा तेषामादिर्न विद्यते।
प्राणिनामिव सा चैषा व्यवस्था नित्यतोच्यते।। २८।।

नदीप्रवाहः प्रतिपलमन्योऽन्यः प्रवर्तते, किन्तु अनादिकालात् 'सोऽयं प्रवाहः' इति प्रवर्तते व्यवहारः, तस्मात् प्रवाहोऽविच्छिन्नः प्रवर्तमानो 'नित्यः' इति व्यपदिश्यते, तथा शब्दानां कृतकत्ववादेऽपि 'अयमेव घटशब्दः प्रथमः' इति दुर्वचत्वात् अनादौ शब्दपूर्वे जगद्व्यवहारे शब्दानामनादित्वस्य स्फुटत्वेन प्रवाहनित्यता तेषां कृतकत्वेऽपि व्यवस्थिता। अतः तस्य व्याकरणगम्या साध्वसाधुव्यवस्थाऽपि पूर्व-पूर्वशिष्टपरम्परा-सिद्धतया नित्या निभालनीया। एवं महता प्रबन्धेन प्रतिपाद्य प्रकरणमुपसंहरन् भर्तृहरिः व्याकरणशास्त्रस्य नित्यत्वं स्थापयति–

तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम्।
आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम्।। ४३।।

एवञ्च साध्वसाधुप्रयोगेण धर्माधर्मौ व्याकरणेनैव निर्णेयौ, इत्यतो व्याकरणनिबन्धनम् तौ। अतः एतच्छास्त्रम् अकृतकम् = अनादिपरम्परया प्राप्तम्। शिष्टैः महर्षिभिः शब्दानामनुशासनं प्रमाणीकृत्य आरभ्यते, न तु नवीनशब्दप्रयोगः स्वयं कल्प्यते, सर्वेषामनादिसिद्धत्वात् इति भावः।

एवञ्च अनादिपरम्पराप्रवाहप्रवाहिता भाषा नित्या वा स्याद् अनित्या वा, तादृशं तद्व्याकरणं नित्यं वा स्यात् अनित्यं वा। अनेन उभयोः भाषाव्याकरणयोः अविनाभूतः सम्बन्धो न हीयते, न वा बाध्यते तयोः समानकालिकं जन्म। वस्तुतस्तु

उभयोः सहभावादेव भाषात्वं समुजृम्भते।

अत एव भगवता भाष्यकारेण समारोहपूर्वकं सिद्धान्तितं वार्तिकम्– सिद्धे शब्दार्थसम्बन्धे इति। सम्बन्धश्च शब्दस्य वाक्यस्य वा अर्थेन सह वाचकत्वरूपः वाच्यवाचकभावस्तादात्म्यं वा। तदेव व्याकरणतत्त्वं व्याकरणकार्यं व्याकरणवेद्यं वा। व्याकरणमेव निहितं तं सम्बधं समुद्भासयति। व्याकरणेनैव सम्बन्धरूपो वाक्यार्थो निर्धार्यते। एवञ्च सम्बन्धस्य व्याकरणाधीनत्वात् सम्बन्धतत्त्वं व्याकरणम्; शक्तिशक्तिमतोरभेदात्। स च सम्बन्धः व्यवहारपरम्परयाऽनादित्वान्नित्यः शब्दार्थयोरिव। तस्माद् वार्तिकनयेनापि व्याकरणं नित्यमिति भाष्याकूतं विभावनीयम्।

अत्रेदमवधेयम्– व्याकरणम् अव्याकृतम् व्याकृतं चेति द्विविधम्। तत्र अव्याकृतम्=अर्थरूपं ज्ञानमयं सार्वकालिकमिति विज्ञेयम्। व्याकृतं च व्याकरणम् आनुपूर्वीरूपम् अर्थसहितं च। तत्र आनुपूर्वीरूपं व्याकृतं व्याकरणम् अवश्यं भाषातः पश्चात्कालिकम् ऋषिभिः प्रणीतम्, किन्तु अव्याकृतम् अर्थरूपं व्याकरणं तु आनुपूर्वीरहितं सद् भाषासमकालिकमेव, अन्यथा भाषैव न समुदियात्, तद्द्वारा अन्येभ्यः अर्थप्रेषणमेव न सम्भवेत्। अतः बीजवृक्षयोरिव कः पूर्वः, कश्च परः इति वक्तुमशक्यम्। बीजाभावे वृक्षसत्ता यथा असम्भवा, वृक्षाभावे च नास्ति बीजोपलब्धिः, तथैव व्याकरणाभावे भाषासत्ता अकल्पना, भाषाया असद्भावे च तद्व्याकरणं शशशृङ्गायितम्। अतः उभयोः पौर्वापर्यविधानं जलताडनवन्निरर्थकम्, शशशृङ्गारोपणं वेति निष्कर्षः इति दिक्।।